**निप** पु॰न॰ नितरां पिबत्यनेन नि+पा—करणे घञर्थे क। १कलसे अमरः नीप+पृषो॰। २कदम्बवृक्षे शब्दच॰।

**निपक्षति** स्त्री नीचा पक्षतिः प्रा॰स॰। अश्वस्य दक्षिणपार्श्वस्थास्थ्नां त्रयोदशानां मध्ये द्वितीये अस्थ्नि वेददी॰“अग्नेः पक्षतिर्वायोः निपक्षतिः” “इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिः” यजु॰ २५।४४।४५ “पक्षस्य पार्श्वस्य मूलभूतानि अस्थीनि वङ्क्रिशब्दवाच्यानि पक्षतिशब्देनोच्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति “षड्विंशतिरस्य वङ्क्रयः” इति कौषीत॰ब्रा॰ १०।४ श्रुतेः तेषां क्रमेण देवता। अग्नेः पक्षतिः प्रथमं दक्षिणपार्श्वास्थि, वायोर्निपक्षतिः नीचा पक्षतिः निपक्षतिः द्वितीयं दक्षिणपार्श्वास्थि” “एवं द्वितीयं वामपार्श्वास्थि सरस्वत्या इति च” वेददी॰। [अमरः

**निप(पा)ठ** पु॰ नि+पठ—भावे अप् पक्षे घञ् वा। पाठे

**निपठितिन्** त्रि॰निपठितमनेन इष्टा॰कर्त्तरि इनि। कृतपाठे

**निपत्यरोहिणी** स्त्री निपत्य रोहिणी रोहितवर्णा स्त्री मयू॰। निपत्यरोहितवर्णायां स्त्रियाम्

**निपत्या** स्त्री निपत्यस्याम् नि+पत—आधारे क्यप् नि॰। १पिच्छिलभूमौ २युद्धभूमौ च।

**निपरण** न॰ निषिद्धं परणं प्रीतिः नि+(निषेधे) पृ—प्रीतौ भावे ल्युट् वा। प्रीत्यभावे तन्निरुक्तिश्च “निपरणात् पुत् नरकं ततस्त्रायते”इति पुत्रशब्दे निरुक्तिः नितरां प्रीतौ २प्रीणने च“निपरणं पित्र्येण तीर्थेन”आश्व॰श्रौ॰२।६।१५

**निपलाश** त्रि॰निपतितं पलाशं यस्य प्रा॰ब॰। निपतितपत्रे वृक्षे “साहास्मै निपलाशमिवोवाद” शत॰ब्रा॰ २।२।१।२०

**निपाक** पु॰ नितरां पाकः प्रा॰स॰। अतिशयपाके शब्दर॰।

**निपात** पु॰ नि+पत--भावे घञ्। १पतने २मृतौ त्रिका॰ ३अधःपतने च “पयोधरोत्सेधनिपातचूर्णिताः” कुमा॰ “क्व च निशितनिपाता वज्रसाराः शरास्ते” शकु॰। निपतन्ति अवयववर्णविनाशादिना अन्यथा निष्पद्यन्ते नि+पत—कर्त्तरि ज्वला॰ण। वर्णागमादिना अन्यथोत्पद्यमाने स्वत्वानिष्पाद्ये ४शब्दभेदे। वर्णागमादिप्रकारश्च स्मर्य्यते “वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्”। “भवेद्वर्णागमात् हंसः सिंहो वर्णविपर्य्ययात्। गूढोत्मा वर्णविकृते वर्णलोपे पृषोदरम्” निपतन्त्यर्थेषु उच्चावचेषु नि+पत--कर्त्तरि ज्वला॰ण। नानाविधार्थेषु वृत्त्या स्वार्थबोधकतया पतनशीले चादौ ५शब्दभेदे “तद्यान्येतानि चत्वारि पदजातानि नामाख्याते उपसर्गनिपाताश्चेति” विभज्य अथ निपाता उच्चावचेष्वर्थेषु निपतन्तीति उपमार्थे वा कर्मोपसंग्रहार्थे पदपूरणार्थे वा” निरुक्तकारः। ते च “प्राग्रीश्वरान्निपाताः” “चादयोऽसत्त्वे” “प्रादयश्च” इत्यादिषु पा॰ सूत्रेषु पठिताः निपातसंज्ञाः भवन्ति। उपसर्गातिरिक्तनिपातानां च द्योतकत्ववाचकत्वोभयस्वीकारः “अव्ययविभक्तीति” पा॰ सू॰ भाष्ये स्थितः। उपसर्गाणान्तु द्योतकत्वमेवेति “गतिर्गताविति” पा॰सू॰भाष्ये स्थितम्। उपसर्गशब्दे १२२५ पृ॰ वैयाकरणमतसिद्धार्थबोधकता उक्ता नैयायिकमते तल्लक्षणादि शब्दश॰प्र॰उक्तं यथा “निपातं लक्षयति। स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः। सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः। यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थः भेदेनान्वयबोधं प्रति योग्यः। न हि स्मृतमनुभूतञ्चेत्यादितः कस्यापि स्मृतः समुच्चय इत्यादिरनुभवः किन्तु स्मृतानुभूतयोः समुच्चय इत्यादिरेव। स्तोकं पचति इत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थ एव प्रत्ययस्तु सुबादिरेव। चः शब्द इत्यादौ नामार्थस्याभेदसाकाङ्क्षश्चकारादिः स्वपरत्वान्न निपातः किन्तु नामैव। पुरन्दरप्रभृतौ तु नाम्नि निपातव्यपदेशः स्वत्वानिष्पाद्यत्वप्रयुक्तो भाक्तः। कार्त्तिक्यादौ यन्न दानं तदत्यन्तविनिन्दितम्”इत्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः किन्तु दानाद्यवच्छिन्ने। स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात्। प्रादयस्तूपसर्गा न सार्थकाः सार्थकास्ते तु निपाता अपि”।

**निपातन** न॰ नि+पत—णिच् ल्युट्। १मारणे “परिचयं चललक्ष्यनिपातने”रघुः। २अधोनयने ३पातने च“अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने” मनुः निपातने दण्डपातने” प्रा॰त॰निपात्यतेऽनेन करणे ल्युट्। ४लक्षणानुसारेणानुत्पद्यमानशब्दसाधनोपाये“यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातनात् सिद्धम्” महाभाष्यम्। सर्वनामसंज्ञासू॰ “निपातनात् णत्वाभावः” “निपातनमप्येवं जातीयकमेव अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं